७

वेदाङ्गसाहित्यम्

प्रस्तावना

अङ्गशब्दस्य व्युत्पत्तिलभ्यः अर्थः अस्ति - 'उपकारकः' इति। 'अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि' अर्थाद् येन कस्य अपि वस्तुनः स्वरूपज्ञाने साहाय्यं प्राप्यते तद् अङ्गम् इति कथ्यते। वेदः स्वयम् एव एकः दुरूहो विषयः अस्ति। तदर्थज्ञाने तस्य कर्मकाण्डस्य प्रतिपादने यानि उपयोगीनि शास्त्राणि सन्ति तानि एव वेदाङ्गानि भवन्ति। वेदाङ्गानां ज्ञानं निखिलवेदज्ञानाय अत्यावश्यकम् एव। तेषां च विवरणम् अस्मिन् अध्याये क्रियते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- शिक्षाग्रन्थानां विषये विस्तारेण ज्ञास्यति।
- निघण्टुग्रन्थानां विषये अधिकतया ज्ञास्यति।
- अन्येषां वेदस्य अङ्गानां विषये ज्ञास्यति।
- यास्कस्य निरुक्तविषयकं ज्ञानं प्राप्स्यति।

७.१) भूमिका

'अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि' इति व्युत्पत्तिवशात् अङ्गशब्दस्य अर्थः भवति 'उपकारकः' इति। अर्थात् यत् कस्य अपि वस्तुनः स्वरूपज्ञाने साहाय्यं करोति तत् अङ्गम् इति कथ्यते। वेदः स्वयम् एव एकः दुरूहो विषयः वर्तते। वेदार्थस्य ज्ञानार्थं तस्य कर्मकाण्डस्य प्रतिपादनार्थं च यानि उपयोगीनि शास्त्राणि सन्ति तानि एव वेदाङ्गानि भवन्ति। वेदस्य यथार्थज्ञानलाभाय षण्णां विषयाणां ज्ञानम् अपेक्षितं भवति। वेदमन्त्राणाम् अवितथोच्चारणम् एव प्रथमम् आवश्यकं वस्तु अस्ति। शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवर्तमानं वेदाङ्गं शिक्षा इति अभिधीयते। वेदस्य मुख्यप्रयोजनं हि वैदिककर्मकाण्डस्य यागस्य च यथार्थानुष्ठाम्। अस्मिन् अर्थे प्रवृत्तम् अङ्गं कल्पः इति कथ्यते। कल्पस्य व्युत्पत्तिलभ्यः अर्थः भवति- **'कल्प्यते समर्थ्यते यागप्रयोगोऽत्र'** इति। व्याकरणं हि वेदानां रक्षकम्, वेदार्थस्य अवबोधने सहायकम्, अपि च प्रकृतिप्रत्ययोपदेशपुरःसरं पदस्वरूपस्य प्रतिपादकं वर्तते,

तस्मात् अर्थनिर्णायकसाधनेषु अन्यतमसाधनत्वेन तस्य प्रयोगः भवति, अस्मात् एव कारणात् व्याकरणं नाम वेदाङ्गं नितान्तम् एव प्रसिद्धं वर्तते, तत् च वेदाङ्गेषु श्रेष्ठस्थानम् अलङ्करोति। वैदिकपदानां व्युत्पादनं हि निरुक्तस्य विषयः अस्ति। निरुच्यते निश्शेषेण उपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तम् इति कथ्यते। वेदाः छन्दोबद्धाः भवन्ति। अतः तेषाम् उच्चारणाय छन्दोज्ञानम् अत्यन्तम् आवश्यकम्। वरुणस्य विषये शुनःशेप-ऋषेः अयं प्रख्यातः मन्त्रः वर्तते -

'निषाद धृतव्रतो वरुणः पस्त्यास्वा।

साम्राज्याय सुक्रतुः।।'

यज्ञभागाः बहुविधाः सन्ति। केचन यज्ञाः संवत्सरसम्बन्धिनः सन्ति। केचन क्रतुसम्बन्धिनः च वर्तन्ते। केचन च तिथि-मास-पक्ष-नक्षत्रपरकाः सन्ति। तस्मात् ज्योतिष-नामकस्य वेदाङ्गस्य अपि स्वकीयं वैशिष्ट्यं विद्यते।

संक्षेपेण वैदिकमन्त्राणां यथार्थोच्चारणाय शिक्षायाः, कर्मकाण्डस्य यज्ञीयानुष्ठानस्य च निमित्ताय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणस्य, अर्थज्ञानाय निर्वचनाय च निरुक्तस्य, वैदिकच्छन्दसां ज्ञानलाभाय छन्दसः तथा अनुष्ठानस्य उचितकालनिर्णयार्थं ज्योतिषशास्त्रस्य च प्रयोजनम् अस्ति।

आधुनिकानाम् इतिहासकाराणां कथनम् इदं यत् षण्णाम् अपि वेदाङ्गानां निर्माणं वैदिकयुगस्य उत्तरार्द्धभागे अभवत्। शिक्षा, व्याकरणम्, कल्पः, निरुक्तम्, छन्दः, ज्योतिषञ्च इत्येतानि वेदाङ्गानां नामानि। पाणिनीयशिक्षायाम् उक्तम् -

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।

ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

(पा. शि. ४१/४२)

पतञ्जलिना अपि उक्तम् - 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति।

षण्णाम् अपि एतेषां वेदाङ्गानाम् उल्लेखः गोपथब्राह्मण-बौधायनधर्मसूत्र-गौतमधर्मसूत्र-रामायणसदृशेषु प्राचीनग्रन्थेषु उपलभ्यते। एतेन तेषां पुरातनतरत्वं सिद्ध्यति। बुद्धावतारात् प्राक्तनकालः उत्तरवैदिककालत्वेन निर्धार्यते पण्डितैः। वेदानां भाषा भावश्च उभौ अपि दुरूहौ स्तः। तस्माद् वेदार्थस्य अवगमनाय वेदाङ्गानाम् अपेक्षा भवति। वेदार्थबोधाय सहायकत्वात् तेषाम् उपकारकत्वं स्पष्टम् एव।

पाठगतप्रश्नाः-१

१. अङ्गशब्दस्य व्युत्पत्तिलभ्यः अर्थः कः।

२. अङ्गशब्दस्य विग्रहं लिखत?

३. **कल्पस्य व्युत्पत्तिलभ्यः अर्थः कः।**

४. षडङ्गानि कानि।

५. पतञ्जलिना वेदाङ्गविषये किमुक्तम्।

७.२) शिक्षा

येन वेदमन्त्राणाम् उच्चारणं शुद्धं सम्पाद्यते तच्छास्त्रं शिक्षा इत्युच्यते। वेदे स्वरस्य प्राधान्यं सर्वैः विदितम्, स्वरज्ञानं च शिक्षातः एव भवति। अत एव इदं शिक्षाशास्त्रं वेदाङ्गम्। तैत्तिरीयोपनिषदः आरम्भे शिक्षाशास्त्रस्य प्रयोजनम् उक्तं यत् - 'अथ शिक्षां व्याख्यास्यामः- वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः' इति। तत्र अकारादिः हि वर्णः, उदात्तादिः हि स्वरः, ह्रस्वादिः हि मात्रा, स्थानप्रयत्नौ च बलं, निषादादिः साम, विकर्षणादिश्च सन्तानः। अस्य अवबोधनम् एव शिक्षायाः प्रयोजनम्।

यथा वैदिकविधीनां सम्पादनार्थं ब्राह्मणग्रन्थाः उपयुज्यन्ते, तथैव उच्चारणप्रयोजनाय शिक्षाया अपि उपयोगो भवति। वेदानां वैदिकसाहित्यस्य वा अध्ययन-अध्यापनविषयक-विधीनां निर्देशः शिक्षाशास्त्रे कृतः। स्वरवर्णादीनाम् उच्चारणानि केन प्रकारेण कर्तव्यानि इति अस्मिन् विषये उपदिशति शिक्षा। सायणस्य ऋग्वेदभाष्यभूमिकायाम् उक्तम् - '**स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।**'

वेदपाठावसरे शुद्धम् उच्चारणं स्वरविधिः च भवेताम्। अशुद्धोच्चारणयुक्तः भ्रष्टस्वरश्च वेदपाठः महद् दुष्फलं जनयति। स परमहानिकरः अपि भवति। इष्टलाभाय यज्ञयागोपासनादिकं यत्कार्यं क्रियते, अशुद्धेन उच्चारणेन तस्मात् कार्यात् विशिष्टलाभो न कदापि सञ्जायते। तादृशम् अशुद्धोच्चारणयुक्तं कार्यं तु महतीम् विपदम् एव उत्पादयति। श्रूयते यत् पुरा 'इन्द्रशत्रुर्वर्धस्व' इति मन्त्रस्य अशुद्धोच्चारणं कृतम्, तेन यजमानं प्रति तत् अनिष्टकारकम् एव सञ्जातम्। पाणिनीयशिक्षायाम् उक्तम् -

"मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्।।"

वेदोच्चारणस्य यथार्थत्वं यथा स्यात्, तस्मात् समीचीनं स्वरज्ञानम् अपेक्ष्यते। उदात्तानुदात्तस्वरितभेदेन स्वरः त्रिविधः वर्तते। 'उच्चैरुदात्तः', 'नीचैरनुदात्तः', 'समाहारः स्वरितः', इत्येतानि पाणिनिना तेषां त्रयाणां स्वराणां लक्षणानि प्रोक्तानि। 'अनुदात्तपदमेकवर्ज्यम्' इति एतस्मिन्

पाणिनीये सूत्रे उक्तं यद् वेदस्य प्रत्येकस्मिन् पदे अवश्यम् एव कश्चित् उदात्तस्वरः भवति, अवशिष्टाः च स्वराः अनुदात्ताः भवन्ति। तेषु एव अनुदात्तेषु स्वरेषु परिस्थितिविशेषे स्वरितः इति अन्यतमः स्वरः जायते। स्वरप्रधानतायाः कारणं वेदेषु अस्ति, तेषां स्वराणाम् अर्थनियन्त्रणत्वम्। केन प्रकारेण स्वराणाम् अर्थनियन्त्रणकारित्वं भवति इति उपरिष्टाद् उदाहरणं निधाय उक्तम् एव। वेदेषु शुद्धोच्चारणं सर्वप्रथमम् इष्टं भवति। तच्च शुद्धोच्चारणं शिक्षाशास्त्रं समुपदिशति। एतस्माद् एव कारणात् षट्सु वेदाङ्गेषु शिक्षानामकस्य अङ्गस्य मूर्धन्यत्वम् आम्नातम्। शिक्षायाः अभिमतः विषयः प्रातिशाख्येषु दृश्यते। प्रातिशाख्यग्रन्थाः शिक्षाशास्त्रस्य च प्राचीनतमाः प्रतिनिधयः इव सन्ति। संहितापाठसम्बन्धिनः सर्वे अपि विषयाः तत्र साङ्गोपाङ्गतया प्रतिपादिताः।

शिक्षाशास्त्रस्य इतिहासः पुरातनतरः। परं तद्विषयकाः प्राचीनतराः ग्रन्था न उपलभ्यन्ते। श्रीवाचस्पतिगैरोला स्वकीये इतिहासे लिखति यत् - सत्यकेतुविद्यालङ्कारस्य मतमिदं यत् जैगीषव्यस्य शिष्यो बाभ्रव्यः शिक्षाशास्त्रं प्रणिनाय इति। महाभारते शान्तिपर्वणि आचार्यगालवकृतस्य शिक्षाग्रन्थस्य उल्लेखः लभ्यते। पूनायां भण्डारकरशोधसंस्थानतः भरद्वाजशिक्षायाः प्रकाशनं जातम् अस्ति। तत्र नागेश्वरभट्टस्य टीका च वर्तते। नागेश्वरमतेन स ग्रन्थः भारद्वाजेन प्रणीतः। शिक्षासङ्ग्रहनामके ग्रन्थे द्वात्रिंशत्-शिक्षापुस्तकानां सङ्ग्रहः प्राप्यते। चतुर्णाम् अपि वेदानां भिन्नभिन्नशाखासु शिक्षायाः सम्बन्धः वर्तते। श्रीबलदेव-उपाध्यायः स्वकीये 'वैदिक साहित्य और संस्कृति'-इत्यभिधेये ग्रन्थे याज्ञवल्क्यशिक्षा-वासिष्ठीशिक्षादीनां विंशतेः ग्रन्थानाम् उल्लेखं विदधाति। साम्प्रतं समवाप्ता पाणिनीयशिक्षा प्राचीनशिक्षासूत्राणां साहाय्येन प्रणीता अभूद् इति बुधानां विचारः। अद्यतनीये युगे स्वामिदयानन्दः पाणिनीयशिक्षायाः उद्धारं कृतवान्। इदम् अपि अत्र स्मरणीयम् यद् इदानीं शुक्लयजुर्वेदे याज्ञवल्क्यशिक्षा, सामवेदे नारदीशिक्षा, अथर्ववेदे माण्डूकीशिक्षा, किञ्च ऋग्वेदे पाणिनीयशिक्षा च प्राप्यते। एतद्भिन्ना न अन्या काऽपि शिक्षा उपलभ्यते।

पाठगतप्रश्नाः-२

६. तैत्तिरीयोपनिषदि शिक्षाविषये किमुक्तम्।

७. सायणः ऋग्वेदभाष्यभूमिकायां किम् आह?

८. जैगीषव्यस्य शिष्यः कः।

९. उदात्त-अनुदात्त-स्वरित-बोधकं पाणिनीयसूत्रद्वयं लिखत।

१०. महाभारते शान्तिपर्वणि कः शिक्षाग्रन्थः उल्लिखितः।

११. केषाञ्चन शिक्षाग्रन्थानां नामानि लिखत।

७.२.१) शिक्षासाहित्यम्

'शिक्षा'-शब्दस्य अत्र अर्थो भवति वैदिकमन्त्राणाम् उच्चारणविधेः शिक्षको ग्रन्थः इति। शिक्षा-प्रातिशाख्ययोः परस्परसम्बन्धविषये मतानाम् ऐक्यं नास्ति। शिक्षायाः साहित्यं पर्याप्तरूपेण विशालम् अस्ति। प्रधानशिक्षायाः संक्षिप्तपरिचयं दातुं प्रयासः क्रियते -

७.२.२) व्यासशिक्षा-

अस्य ग्रन्थस्य उपरि महामहोपाध्याय-पण्डितवैङ्कटरामशर्मणा रचितो वेदतैजसनाम्ना व्याख्याग्रन्थः समुपलब्धः अस्ति।

७.२.३) भरद्वाजशिक्षा-

तैत्तिरीयसंहितया सह अस्य ग्रन्थस्य सम्बन्धः अस्ति। अयं ग्रन्थः संहिताशिक्षा इति नाम्ना व्यवहृतः अस्ति। अस्य ग्रन्थस्य प्रधानलक्ष्यं हि संहितापदानां शुद्धता एव। तदर्थं विशिष्टनियमानाम् अस्मिन् ग्रन्थे विवरणम् अस्ति। क्वचिद् विशिष्टशब्दानां सङ्कलनम् अपि विद्यते। तैत्तिरीयसंहितायां वृजिन् -शब्दस्य उपलब्धिः भवति। किञ्च जकारस्य उदात्तस्वरयुक्तत्वे सति अकारयुक्तः वृजन इत्येवं भवति(**वृजने 'ज' उदात्तश्चेद् अकारेण सहोच्यते**)। अनेन प्रकारेण पर्शु-शब्दः अन्तोदात्तः चेत् 'परशु' इत्यस्मिन् रूपे परिणतो भवति। अनेन एव प्रकारेण अत्र नियमाः प्रदर्शिताः। अक्षरक्रमेण ग्रन्थस्य सङ्कलनम् अस्ति। शिक्षायाः अन्येषां विषयाणाम् अभावः अत्र विद्यते। इयं शिक्षा प्राचीना इति प्रतीयते। श्रीनिवासदीक्षीतेन रचिता सिद्धान्तशिक्षा अपि अस्याः शिक्षायाः विषयप्रतिपादने अनुगमनं करोति।

७.२.४) पाणिनीयशिक्षा-

शिक्षा इयम् अतिप्रसिद्धा लोकप्रिया च अस्ति। लौकिकानां वैदिकानाञ्च शास्त्राणां कृते इयं शिक्षा नितान्तम् उपयोगित्वेन अधिकमहत्त्वपूर्णा अस्ति। अस्मिन् ग्रन्थे षष्टिः श्लोकाः सन्ति। एतेषु श्लोकेषु उच्चारणविधिसम्बद्धानां विषयाणां संक्षिप्तं किञ्च उपादेयं विवरणं प्रदत्तम् अस्ति। अस्य ग्रन्थस्य रचयितुः नाम अद्यापि अज्ञातम् एव अस्ति। ग्रन्थान्ते पाणिनेः उल्लेखः दाक्षीपुत्रनाम्ना कृतः वर्तते।

'शङ्करः शाङ्करीं प्रादात् दाक्षीपुत्राय धीमते।

वाङ्मयेभ्यः समाहृत्य देवीं वाचम् इति स्थितिः।।'

(पा. शि. ४६)

अनेन उल्लेखेन स्पष्टः भवति यत् पाणिनिः अस्य ग्रन्थस्य लेखको नास्ति। पाणिनिमतानुयायी कोऽपि वैयाकरणः अस्य उपयोगिनः ग्रन्थस्य निर्माणम् अकरोत्। अस्य ग्रन्थस्य उपरि बहुविधाः टीकाः अपि उपलब्धा भवन्ति। परिमाणे न्यूनत्वेन अपि सारभूतत्वाद् अस्य अनुशीलनेन संस्कृतभाषायाम् उपयोगिनः विषयस्य सुष्ठु ज्ञानं प्राप्तुं शक्यते। शिक्षासङ्ग्रहनामके ग्रन्थे एकत्र प्रकाशितानां

द्वात्रिंशच्छाखानां समुच्चयः अस्ति। एताः शिक्षाः चतुर्णां वेदानां विभिन्नशाखातः सम्बद्धाः सन्ति। आसाम् एव शिक्षाणां संक्षिप्तवर्णनम् अत्र दास्यते।

७.२.५) याज्ञवल्क्यशिक्षा-

परिमाणेन इयं शिक्षा बृहदाकारा अस्ति। अत्र द्वात्रिंशदधिकद्विशतं (२३२) श्लोकाः सन्ति। अस्याः सम्बन्धः शुक्लयजुर्वेदीय-वाजसनेयीशाखया सह अस्ति। अस्यां शिक्षायां वैदिकस्वराणाम् उदाहरणेन सह विशिष्टं विस्तृतं च वर्णनं वर्तते। लोप-आगम-विकार-प्रकृतिभावाख्यानां चतुर्विधसन्धीनां विवेचनम् अपि अत्र वर्तते। वर्णानां विभेद-स्वरूप-साम्य-वैषम्यादीनाम् अपि वर्णनम् अस्यां शिक्षायां विद्यते।

७.२.६) वासिष्ठीशिक्षा-

अस्याः अपि सम्बन्धः वाजसनेयीसंहितया सह एव अस्ति। अस्यां संहितायाम् ऋङ्मन्त्रयजुर्मन्त्रयोः पार्थक्यम् अतिविस्तरेण वर्णितम् अस्ति। अनया शिक्षया अनुसारेण समग्रायामपि शुक्लयजुर्वेदीयसंहितायाम् ऋग्वेदीयाः १२६७ मन्त्राः सन्ति। अत्र यजुषां संख्याः २८२३ सन्ति। अयं संख्याविभागः अस्य वेदस्य अध्ययनकर्तृभ्यः अतीव उपयोगी भवति।

७.२.७) कात्यायनीशिक्षा-

अस्यां शिक्षायां केवलं त्रयोदश श्लोकाः वर्तन्ते। जयन्तस्वामिनामा कोऽपि विद्वान् अस्याः टीकां लिखितवान्।

७.२.८) पाराशरीशिक्षा-

अस्यां शिक्षायां षष्ट्यधिकशतं (१६०) श्लोकाः सन्ति। अस्मिन् ग्रन्थे अपि सन्धि-स्वर-वर्णादीनां विषयाणां विवेचनम् अस्ति।

७.२.९) माण्डव्यशिक्षा-

इयं शिक्षा शुक्लयजुर्वेदेन सह सम्बद्धा अस्ति। अस्मिन् ग्रन्थे वाजसनेयीसंहितायां प्रयुक्तानां नामौष्ठ्यवर्णानां सङ्ग्रहो विद्यते। अतीवपरिश्रमेण समस्तसंहिताया अध्ययनं कृत्वा उपादेयः अयं ग्रन्थः लिखितः अस्ति। सामान्यशिक्षाग्रन्थेभ्यः अस्य ग्रन्थस्य विशिष्टता अपि स्पष्टा एव अस्ति। स्वरस्य वर्णस्य च विचारम् अकृत्वा एव केवलम् ओष्ठेन उच्चारितवर्णानाम् एवात्र सङ्ग्रहः कृतः वर्तते।

७.२.१०) अमोघानन्दिनीशिक्षा-

अस्मिन् ग्रन्थे त्रिंशदधिकशतं (१३०) श्लोकाः सन्ति। अत्र स्वरस्य वर्णस्य च सूक्ष्मविचारः कृतः अस्ति। अस्य ग्रन्थस्य संक्षिप्तसंस्करणमपि अस्ति। अस्मिन् संस्करणे केवलं सप्तदश श्लोकाः एव वर्तन्ते।

७.२.११) माध्यन्दिनीशिक्षा-

ग्रन्थे अस्मिन् केवलं द्वित्वनियमानां विवेचनम् अस्ति। द्विविधः अयं ग्रन्थः, एकः बृहदाकारः, द्वितीयस्तु लघ्वाकारः एव। प्रथमो गद्यात्मकः द्वितीयः पद्यात्मकः चेति।

७.२.१२) वर्णरत्नप्रदीपिका-

अस्य ग्रन्थस्य रचयिता भारद्वाजवंशीयः कोऽपि अमरेशनामकः विद्वान् अस्ति। अस्य अपि समयः अज्ञातः एव। अस्मिन् ग्रन्थे सप्तविंशत्यधिकशतं (२२७) श्लोकाः सन्ति। नामानुरूपेण एव अस्मिन् ग्रन्थे वर्ण-स्वर-सन्धीनां साङ्गोपाङ्गं विवेचनम् अस्ति।

७.२.१३) केशवीशिक्षा-

अस्याः रचयिता आस्तिकमुनेः वंशजो गोकुलदैवज्ञस्य पुत्रः केशवदैवज्ञः अस्ति। द्विविधा इयं शिक्षा समुपलब्धा भवति। प्राथमिकीशिक्षायां माध्यन्दिनशाखातः सम्बद्धपरिभाषाणां विस्तृतं विवेचनम् अस्ति। प्रतिज्ञा-समस्तानां नवसूत्राणां विस्तृतव्याख्या उदाहरणेन सह अत्र प्रदत्ता अस्ति। द्वितीया शिक्षा पद्यात्मिका वर्तते, एकविंशतौ पद्येषु अत्र स्वरस्य विस्तृतविचारः वर्तते।

७.२.१४) मल्लशर्मशिक्षा-

अस्य ग्रन्थस्य रचयिता उपमन्युगोत्रीयः अग्निहोत्री खगपतिमहोदयस्य पुत्रः मल्लशर्मा इति नामकः कोऽपि कान्यकुब्जब्राह्मणः। अस्यां शिक्षायां चतुःषष्टिः (६४) श्लोकाः सन्ति। लेखककथनानुसारेण अस्या रचना १७८१-विक्रमाब्दे अभवत्।

७.२.१५) स्वराङ्कशशिक्षा-

अस्याः शिक्षाया रचयिता जयन्तस्वामीनामकः कोऽपि विद्वान् आसीत्।

७.२.१६) षोडशश्लोकीशिक्षा-

श्रीरामकृष्णनामकेन विदुषा षोडशश्लोकीशिक्षा इति नामकः लघुः एकः ग्रन्थः प्रणीतः, यत्र स्वरस्य व्यञ्जनस्य च विचारः कृतः।

७.२.१७) अवसाननिर्णयशिक्षा-

वैदिकव्याकरणसम्बन्धिपदप्रयोगनियमानां ज्ञानाय स्वरवर्णादिज्ञानानां सौलभ्याय च इयं शिक्षा प्रणीता अनन्तदेवेन विदुषा।

७.२.१८) प्रातिशाख्यप्रदीपशिक्षा-

इदं पाण्डित्यपूर्णं शिक्षाशास्त्रं सदाशिवपुत्रेण बालकृष्णनाम्ना केनापि विदुषा कृतम् अस्ति। शिक्षा इयं परिमाणे गरिष्ठा। शिक्षाशास्त्रमिदं किमपि ईदृशं प्राचीनम् शास्त्रम् आलोक्य एव प्रणीतम्। अस्मिन् ग्रन्थे कतिपयानि व्याकरणप्रयोगपराणि पद्यानि ग्रन्थान्तरात् समुद्धृतानि सन्ति। स्वरवर्णादिशिक्षायाः समग्रविषयाणां सरसं सरलं साङ्गोपाङ्गं च विवेचनम् अत्र वर्तते। शिक्षाशास्त्रस्य यथार्थज्ञानलाभाय ग्रन्थोऽयम् अतीव उपादेयः अस्ति।

७.२.१९) नारदीयशिक्षा-

अयं शिक्षाग्रन्थः सामवेदेन सम्बद्धः अस्ति। अतिविस्तृता इयम् उपादेया च शिक्षा अस्ति। अस्य ग्रन्थस्य शोभाकरभट्टेन विस्तृता व्याख्या अपि लिखिता। व्याख्येयं नितान्तप्रौढा प्रसिद्धा च अस्ति। सामवेदीयस्वराणां रहस्यं विज्ञातुम् अयं ग्रन्थः अतीव उपयोगी वर्तते। सामवेदीये द्वे अन्येऽपि शिक्षे स्तः- (१७) **गौतमी** (१८) **लोमेंशीशिक्षा चेति।**

७.२.२०) माण्डूकीशिक्षा-

अथर्ववेदेन सम्बद्धा इयं शिक्षा अस्ति। अस्याम् ऊनाशीत्यधिकशतं (१७९) श्लोकाः सन्ति। अथर्ववेदस्य स्वराणां वर्णानां च सुष्ठुज्ञानाय इयं शिक्षा महनीया श्लाघनीया च अस्ति। कतिपये अन्ये अपि शिक्षाग्रन्थाः प्राप्यन्ते, येषां नाम-निर्देशः एव पर्याप्तो भविष्यति। (२०) **क्रमसन्धानशिक्षा,** (२१) **गलदृक्शिक्षा,** (२२) **मनःस्वार-शिक्षा।** एतेषां ग्रन्थानां रचयिता याज्ञवल्क्यमुनिः अस्ति।

पाठगतप्रश्नाः-३

१२. भरद्वाजशिक्षायाः अपरं नाम किम्।

१३. पाणिनीयशिक्षायां कति श्लोकाः सन्ति।

१४. याज्ञवल्क्यशिक्षायां केषां विवेचनं वर्तते।

१५. वासिष्ठीशिक्षायाः सम्बन्धः कया संहितया सह अस्ति।

१६. कात्यायनीशिक्षायां कति श्लोकाः वर्तन्ते।

१७. पाराशरीशिक्षायां केषां विषयाणां विवेचनं वर्तते।

१८. अमोघानन्दिनीशिक्षायां कति श्लोकाः सन्ति।

१९. केशवीशिक्षायाः रचयिता कः।

२०. मल्लशर्मशिक्षायाः रचयिता कः।

२१. माण्डूकीशिक्षा केन वेदेन सम्बद्धा अस्ति।

७.३) कल्पः

वेदानां द्वितीयम् अङ्गम् अस्ति कल्पः। ब्राह्मणकाले यागस्य तावान् प्रचारो जातो यत् तेषां यथावत् ज्ञानाय पूर्णपरिचयप्रदायक-ग्रन्थानाम् आवश्यकता अनुभूयते स्म। ताम् एव आवश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणि विरचितानि। वेदविहितानां कर्मणां व्यवस्थापनं क्रमपूर्वकं कल्पशास्त्रे कल्पितम्। उक्तञ्च-

'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्।' इति।

कल्पसूत्राणि द्विविधानि- **श्रौतसूत्राणि स्मार्त्तसूत्राणि** च। श्रुत्युक्तानां यागविधीनां प्रकाशकानि हि श्रौतसूत्राणि। स्मार्त्तसूत्राणि अपि द्विधा - गृह्यसूत्राणि धर्मसूत्राणि चेति।

श्रौतसूत्रेषु अग्नित्रयाधानम्, अग्निहोत्रम्, दर्शपूर्णमासः, पशुयागः इत्येते नानाविधाः सोमयागाश्चेति विषयाः समुपपादिताः।

मुख्यतः कल्पसूत्राणि सन्ति चतुर्विधानि-**१.श्रौतसूत्रम्,२. गृह्यसूत्रम्, ३. धर्मसूत्रम्, ४.शुल्वसूत्रञ्चेति।**

श्रौतसूत्रे तेषाम् अनुष्ठानाचारयागानां वर्णनं विद्यते, येषां सम्पादनं त्रैवर्णिकैः अवश्यं कर्तव्यम्। षोडशसंस्काराणां विशिष्टं वर्णनम् अपि गृह्यसूत्रेषु कृतम्। मुख्यतः गृह्यसूत्रे गृह्याग्निसम्बद्धयागानाम् उपनयनविवाहश्राद्धादीनां संस्काराणां विस्तृतं विवरणं विद्यते।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्त्तव्यचर्याः, चत्वारो वर्णाः, चत्वारः आश्रमाः, तेषां धर्माः पूर्णतया निरूपिताः। धर्मसूत्रे चतुर्णां वर्णानाम् आश्रमाणाञ्च किञ्च राज्ञाम् अपि कर्तव्यानि निर्दिष्टानि सन्ति। इमानि एव त्रीणि वस्तुतः प्रधानानि कल्पसूत्राणि मतानि।

चतुर्थं शुल्वसूत्रं तु विशेषतः वेदिनिर्माणप्रकारं प्रतिपादयति। अस्य सूत्रस्य वैज्ञानिकं महत्त्वम् अस्ति। मुख्यतः शुल्बसूत्रम् अपि कल्पसूत्रमेव, तत् श्रौतसूत्रान्तर्गतम्। शुल्वं मापक्रिया। इदं सूत्रम् एव भारतीयज्यामितिशास्त्रस्य प्रवर्तकम्। पाश्चात्यैः पिथागोरस-प्रभृतिभिः ज्यामितिशास्त्रं प्रणीतम् इति ये कल्पयन्ति, ते शुल्वसूत्रं दृष्ट्वा दृढीकुर्वन्तु यत् इदम् ज्यामितिशास्त्रं भारतीयैः पाश्चात्यज्यामितिशास्त्रोत्पत्तेः बहुदिवसपूर्वम् एव प्रकटीकृतम् इति।

कल्पसूत्राणि तत्तद्वेदसम्बन्धनिबन्धनभेदयुतानि। तत्र-

ऋग्वेदस्य कल्पसूत्रम् - आश्वलायनम्, शाङ्खायनञ्चेति। अनयोः उभयोरपि कल्पसूत्रयोः श्रौतसूत्रं गृह्यसूत्रञ्च सम्मिलितं विद्यते। शुक्लयजुर्वेदस्य कल्पसूत्रम् - कात्यायनश्रौतसूत्रम्, पारस्करगृह्यसूत्रम्, कात्यायनशुल्बसूत्रं चेति।

कृष्णयजुर्वेदस्य कल्पसूत्रम् - बौधायनसूत्रम्, आपस्तम्बसूत्रञ्चेति। अनयोः कल्पसूत्रयोः श्रौतगृह्यधर्मशुल्वसूत्राणि सर्वाणि अपि सन्ति इति ग्रन्थौ इमौ पूर्णरूपौ।

सामवेदस्य कल्पसूत्रम् - लाट्यायनश्रौतसूत्रम्, द्राह्यायणञ्चेति। जैमिनीयशाखायाः श्रौतसूत्रम्, जैमिनिगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रञ्चेति।

सामवेदे एव आर्षेयकल्पस्य अपि गणना भवति। अयम् एव कल्पः मशककल्पसूत्रनाम्ना अपि प्रथते। सूत्रमिदं लाट्यायनश्रौतसूत्रात् प्राचीनं वर्तते। अथर्ववेदस्य कल्पसूत्रम् - वैतानश्रौतसूत्रम्, कौशिकसूत्रञ्चेति। वैतानसूत्रं न अतिप्राचीनम्, कौशिकसूत्रञ्च अभिचारक्रियावर्णनपरम्।

पाठगतप्रश्नाः-४

२२. कल्पसूत्राणां प्रकारद्वयं लिखत।
२३. स्मार्तसूत्राणां द्वौ प्रकारौ लिखत।
२४. मुख्यतः कति कल्पसूत्राणि।
२५. ऋग्वेदस्य कल्पसूत्रं किम्।
२६. सामवेदस्य कल्पसूत्रं किम्।

७.४) व्याकरणम्

वेदानां रक्षकत्वाद्, वेदार्थावबोधने सहायकत्वात्, प्रकृतिप्रत्ययोपदेशेन सह पदस्वरूपस्य प्रतिष्ठापकत्वाद् अर्थनिर्णयनकृत्साधनेषु अन्यतमसाधनत्वेन प्रयुक्तत्वाद् व्याकरणं नाम अङ्गं नितान्तम् एव महनीयं वर्तते, वेदाङ्गेषु इदं श्रेष्ठञ्च स्मृतम्। **'व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम्' इति व्युत्पत्तेः व्याकरणपदस्य अर्थः** भवति पदमीमांसाकरं शास्त्रम् इति। व्याकरणं वेदस्य मुखत्वेन स्मृतम् -

'मुखं व्याकरणं स्मृतम्।'

भाषा लोकव्यवहारं प्रवर्तयति। यदि भाषा न स्यात् तर्हि जगदिदम् अन्धतमसि मज्जेत्। यथोक्तं दण्डिना-

'इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'

भाषायाः शुद्धये व्याकरणस्य अपेक्षा भवत्येव। न हि व्याकरणज्ञानशून्यः साधून् शब्दान् प्रयोक्तुं शक्नोति।

स्वयम् ऋक्संहितायाम् अस्य व्याकरणशास्त्रस्य प्रशंसायाम् अनेके मन्त्राः भिन्न-भिन्नस्थानेषु उपलब्धाः भवन्ति। ऋग्वेदस्य एकस्मिन् सुप्रसिद्धमन्त्रे व्याकरणं वृषभस्य रूपकत्वेन प्रतिपादितम् अस्ति -

चत्वारि शृङ्गाः त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्ता सोऽस्य।

त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याम् आविवेश।।

-(ऋ. ४/५८/६)

इत्यादिशब्दैः तत्प्रशंसा श्रूयते। अस्य वृषभरूपव्याकरणस्य चत्वारि शृङ्गाणि सन्ति - नाम-आख्यात-उपसर्ग-निपातरूपाणि। अस्य त्रयः पादाः भूत-भविष्य-वर्तमानाः। सुप् तिङ् च द्वे शीर्षे स्तः,सप्त विभक्तयश्च सप्त हस्ताः सन्ति। उरसि शिरसि कण्ठे च त्रिधा बद्धो वृषभः रोरवीति। एवंविधव्याकरणज्ञानाद् यः अनभिज्ञः अस्ति स जानन्नपि न जानाति, पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोति। किञ्च यो हि जनः व्याकरणशास्त्रज्ञः अस्ति, तत्सन्निधौ वाणी सुसज्जिता कामिनी इव समागत्य सर्वतोभावेन समर्पिता भवति -

उतत्वः पश्यन् न ददर्श उतत्वः शृण्वन् न शृणोत्येनाम्।

उतोत्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासाः।।

आचार्यवररुचिः व्याकरणशास्त्रस्य महनीयतां गायन् यदा तस्य अध्ययनस्य पञ्च प्रयोजनानि प्रतिपादयति तदा महर्षिः पतञ्जलिः तदध्ययनस्य प्रयोजनानि त्रयोदश इति वदति। तेन व्याकरणशास्त्रं नितरां प्राचीनं शास्त्रम् अस्ति इति ज्ञायते। न हि व्याकरणज्ञानशून्यः साधून् शब्दान् प्रयोक्तुम् ईशः। वेदस्य रक्षार्थं व्याकरणस्य अध्ययनम् अत्यावश्यकम्। 'रक्षार्थं वेदानाम् अध्येयं व्याकरणम्, लोपागमवर्णविकारज्ञो हि पुरुषः सम्यग् वेदान् परिपालयिष्यति' इति पतञ्जलिः। वेदरक्षाक्षमतयैव व्याकरणस्य वेदाङ्गत्वम् अपि समर्थ्यते। व्याकरणस्य सर्वाणि प्रयोजनानि उक्तानि महाभाष्ये - 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।' वेदानाम् रक्षार्थम् व्याकरणस्य अध्ययनं करणीयम्। ऊहः खल्वपि, न सर्वैः लिङ्गैः, न सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदिताः, यज्ञगतेन पुरुषेण येषाम् अवश्यं यथायथं विपरिणामः कर्तव्यः,तान् अवैयाकरणः यथायथं विपिरणमयितुं न शक्नोति। तस्माद् व्याकरणम् अध्येयम्। एवम् अन्यानि अपि अपभाषण-दुष्टशब्द-अर्थज्ञान-धर्मलाभ-नामकरणादीनि प्रयोजनानि व्याख्यातानि महाभाष्ये।

व्याकरणशास्त्रं तु नितरां प्राचीनशास्त्रम् अस्ति। वैदिकमन्त्रेषु उलभ्यमानाः तत्तत्पदविषयिण्यः व्युत्पत्तयः अपि उपरि अभिहितम् अभिधानं समर्थयन्ति -

१.'यज्ञेन यज्ञमजयन्त देवाः' (ऋग्.१/१६४/५०)। यजयाच-इत्यादिना अनङ्।

२.'ये सहांसि सहसा सहन्ते' (ऋग्. ६/६६/९)। सहधातोः असुन् उणादौ।

३.'धान्यमसि धिनुहि' (यजु. १/२०)। धिनोतेर्धान्यम्, महाभारते।

४. 'केतपूः केतं नः पुनातु' (यजु. ११/७)। क्विप् च।

५.'तीर्थैस्तरन्ति' (अथर्व. १८/४/७)। पातृतुदिव... इति स्थक्।

व्याकरणशास्त्रस्य प्रमाणभूत आचार्यः पतञ्जलिः व्याकरणशास्त्रस्य उपरिनिर्दिष्टानि प्रयोजनानि वर्णयन् 'चत्वारि शृङ्गाः' ,'चत्वारि वाक्', 'उतत्वः', 'सक्तुमिव', 'सुदेवोऽसि' - इत्येतत् मन्त्रपञ्चकम् उद्धरति स्म। पतञ्जलेः अपि प्राचीनतरो यास्कः अपि 'चत्वारि वाक्' इत्येतस्य मन्त्रस्य व्याख्यां व्याकरणशास्त्रपरकाम् एव चकार। व्याकरणम् इत्येतत् पदं यस्माद् धातोः निष्पद्यते, तस्य अपि मूलार्थो यजुषि - 'दृष्ट्वा रूपे व्याकरोत् सत्त्वाऽनृते प्रजापतिः' इत्येतस्मिन् वाक्ये प्रयुक्तः प्राप्यते।

व्याकरणशास्त्रस्य उत्पत्तिम् अधिकृत्य तु न निश्चिततया किमपि कथनं सम्भवम्। इदं तु वक्तुं शक्यं यद् उपलब्धेभ्यः वैदिकपदपाठेभ्यः प्राग् व्याकरणं शास्त्रं पूर्णतां गतम्। प्रकृतिप्रत्ययधातूपसर्गसमासवतां पदानां विभागश्च कृत्स्नतया निर्धारितो जातो यदा तस्य गतस्य कालस्य अनेकसहस्राब्दाः व्यतीताः। वाल्मीकिरामायणस्य रचनाकाले व्याकरणशास्त्रस्य अध्ययनम् अध्यापनं च सुव्यवस्थिततया प्रचलितम् आसीत् इत्येतद् हि -

'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।

बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्।।'

इत्यादिश्लोकेभ्यः विदितं जायते। महाभारतयुद्धकालवर्तिनि यास्क-निरुक्ते बहूनां व्याकरणाचार्याणाम् उल्लेखः दृश्यते। आचार्यः शाकटायनः तु स्वकीयं व्याकरणं यास्काद् अपि प्राक् लिखितवान्। तैत्तिरीयसंहितायाम् अस्य विषयस्य सर्वप्रथमः तथा प्राचीनतमः उल्लेखः प्राप्यते -

'वाग् वै पराच्य व्याकृताऽवदत्। ते देवा इन्द्रम् अब्रुवन् - इमां नो वाचं व्याकुर्विति। सोऽब्रवीत् - वरं वृणे, मह्यं चैवेष वायवे च सह गृह्यता इति। तस्माद् ऐन्द्रवायवः सह गृह्यते। तामिन्द्रो मव्यातोः वक्रम्य व्याकरोत्। तस्मादियं व्याकृता वामुद्यते।' (तै.सं.६।४।७।३)।

आचार्यपतञ्जलिः स्वकीये महाभाष्ये लिखितवान् -

'बृहस्पतिश्च वक्ता। इन्द्रश्च अध्येता। दिव्यं वर्षसहस्रम् अध्ययनकालः। अन्तं च न जगाम।' (महाभाष्ये पस्पशाह्निकम्)।

इत्थम् अगाधम् अनन्तञ्च शब्दार्णवम् अस्ति। अत एव पण्डितसमाजे एका प्रचलिता प्रसिद्धा गाथा च अस्ति -

'समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।

तद्भागभागाच्च शतं पुरन्दरे कुलाग्रबिन्दूत्पतितं हि पाणिनौ।।'

पतञ्जलिमुनिः लिखति -

'पुरा कल्प एतद् आसीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते।' इत्येतेन अपि व्याकरणं प्रति लोकस्य प्रवृत्तिः चिरात् आसीद् इति ज्ञायते।

यदा कापि भाषा व्यवहारातीततां प्रयाति तदा तस्या भाषायाः ज्ञानं व्याकरणमन्त्रेण न प्रतिपत्तुं शक्यं भवति। व्याकरणम् एव भाषायाः स्वरूपसङ्घटनं सर्वात्मना कुरुते। तस्माद् व्याकरणम् एव भाषाज्ञानलाभाय सर्वेषाम् अपि अष्टानां शक्तिग्राहकाणां मध्ये मूर्धन्यं स्थानम् अध्यास्ते। व्याकरणस्य नितान्तम् एव उपादेयतां श्रेष्ठताञ्च तत्र तत्र अवलोक्य एव तस्य महिम्नि बुधैः अभिहितम् इदम् -

'यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।

बन्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना।।'

व्याकरणानि बहुभिः वैयाकरणैः महर्षिभिः प्रणीतानि। तेषु व्याकरणकर्तृषु विद्वत्सत्तमेषु - इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रः, इत्येते अष्टौ सन्ति सुप्रथिताः। न केवलम् एतेषाम् अष्टानाम् एव व्याकरणकर्तृणां व्याकरणानि वर्तन्ते, अपि तु अन्येषाम् अपि आचार्याणां व्याकरणानि श्रूयन्ते। यथा - कौमारं सारस्वतं शाकलञ्च व्याकरणम्। व्याकरणकारान् अथ च व्याकरणानि अधिकृत्य एतच्छलोकद्वयं प्रथितम् अस्ति। -

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।।

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।'

अपरञ्च व्याकरणानि अष्टौ -

'प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।

याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।

सावित्रञ्च तथा प्रोक्तमष्टमं वैष्णवं तथा।' (भविष्यपुराणे ब्राह्मपर्वणि)

लघुत्रिमुनिकल्पतरुकृतः तु नव व्याकरणानि स्मरन्ति-

'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।'

अनेन व्याकरणानाम् अष्टविधत्वम् एव प्रसिद्धम्। यथोक्तं भास्करेण - 'अष्टौ व्याकरणानि षट् च भिषजां व्याचष्टा ताः संहिताः' इति भविष्यपुराणोक्तानि व्याकरणानि तु प्रसिद्धानि। ऐन्द्रादीनि एव प्रसिद्धानि।

एतैः निर्देशैः इन्द्रेण व्याकरणस्य रचना कृता इत्यस्य वर्णनं स्फुटम् एव प्रतिभाति। व्याकरणमिदं ग्रन्थरूपे आसीत् इत्यस्य अपि प्रमाणं प्राप्यते एव। यथा - नन्दिकेश्वरः काशिका-वृत्तेः

तत्त्वविमर्शनीव्याख्यायाम् उपमन्युना लिखितम् - **'तथा चोक्तम् इन्द्रेण अन्तर्वर्णसमुद्भूता धातवः परिकीर्तिता इति।'**

वररुचिः ऐन्द्रनिघण्टुः इत्येतस्य आरम्भे एव अस्य निर्देशं कृतवान्-

'पूर्वं पद्मभुवा प्रोक्तं श्रुत्वेन्द्रेण प्रकाशितम्।

तदबुधेभ्यो वररुचिः कृतवानिन्द्रनामकम्।।'

वोपदेवेन संस्कृतस्य मान्येषु व्याकरणसम्प्रदायेषु प्रथमस्थानम् इन्द्राय एव प्रदत्तम् -

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमर्जैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।।'

सारस्वतप्रक्रियायाम् अनुभूतिस्वरूपाचार्येण निगदितम् -

'इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।

प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं कथं नरः।।'

डाँ वर्नलमहोदयस्य कथनानुसारेण तमरलभाषाया आद्यव्याकरणं तोलकप्पियम् इत्याख्ये व्याकरणे ऐन्द्रव्याकरणात् एव साहाय्यं गृहीतम्। वररुचिः 'भवन्ती', 'अद्यतनी', 'हस्तनी' इत्यादीनां पारिभाषिकशब्दानाम् उल्लेखं कृतवान्, ते पाणिनेः 'लट्,लुङ्, लिट्' इत्यादिशब्देभ्यः प्राचीनम् अस्ति। एतेषां प्रयोगः ऐन्द्रव्याकरणे अपि अस्ति इति अनुमीयते।

'वर्तमाने लट् (३/२/१२३)**-वार्तिक-प्रवृत्तस्य विरामे शिष्या भवन्त्यावर्तमानत्वात्। भवन्तीति लटः पूर्वाचार्यसंज्ञा'** (कैयटः)।

गोपथब्राह्मणे व्याकरणविषयाः निर्दिष्टाः सन्ति। स्पष्टतः व्याकरणशास्त्रस्य इतिहासावलोकनेन विदितं भवति यद् भारते पुरा अनेके व्याकरणकर्तारः आचार्याः आसन्। तत्र आपिशलि-शाकटायन-गालवेन्द्रादीनां व्याकरणकर्तृणाम् उल्लेखः कृतः वर्तते। परं साम्प्रतं तु पाणिनीयं व्याकरणम् एव प्राप्यते। तत्कृतः ग्रन्थः- अष्टाध्यायी सर्वाङ्गसुललितो भूत्वा विभाति। तत्र वैज्ञानिक्या पद्धत्या व्याकरणं प्रतिपादितम् अस्ति। यादृशं हि सुललितं देववाण्याः शास्त्रीयं विवेचनं तत्र दृश्यते, नान्यत्र तादृशं क्वापि विलोक्यते। तत्र लौकिकं वैदिकम् उभयविधम् अपि व्याकरणम् आम्नातम्।

पाठगतप्रश्नाः-५

२७. व्याकरणशब्दस्य व्युत्पत्तिं निर्दिशत।

२८. इदमन्धतमः कृत्स्नमित्यादिश्लोकः केन लिखितः।

२९. व्याकरणं शरीरस्य केन तुल्यम्।

३०. ऋग्वेदे व्याकरणं किंरूपकत्वेन प्रतिपादितम्।

३१. व्याकरणकर्तृषु बहुषु विद्वत्सत्तमेषु कति वैयाकरणाः सुप्रथिताः, के च ते।

७.५) निरुक्तम्

निरुच्यते निश्शेषेण उपदिश्यते तत् तदर्थानाम् अवबोधनाय पदजातं यत्र तन्निरुक्तम् इति कथ्यते। निरुक्तं निघण्टोः महत्त्वपूर्णा टीका अस्ति। निघण्टौ वेदस्य कठिनशब्दानां समुच्चयः अस्ति। निघण्टुग्रन्थस्य सङ्ख्याविषये पर्याप्तः मतभेदः अस्ति। सम्प्रति समुपलब्धः निघण्टुग्रन्थः एक एव अस्ति, परन्तु प्राचीनपरम्पराया अनुशीलनेन ज्ञातो भवति यत् निघण्टुग्रन्था अनेके सन्ति। (द्रष्ट. दुर्गावृत्तिः पृ. ३) निरुक्तस्य आरम्भे 'निघण्टुम्' 'समाम्नाय' इत्येतेन पदेन अभिधीयते। तेन अस्य प्राचीनत्वं प्रमाणितं भवति। महाभारतस्य मोक्षधर्मपर्वानुसारेण अस्य निघण्टोः रचयिता प्रजापतिकश्यपः आसीत् -

'वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।

निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम्।।

कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।

तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः।।'

(महा. मो. ध. प. अ. ३४२, श्लो. पृ. ८६-८७)

वर्तमाने निघण्टुग्रन्थे 'वृषाकपिः' शब्दः सङ्गृहीतः अस्ति। अतः पूर्वोक्तकथनानुसारेण ज्ञातः भवति यत् महाभारतकाले अस्य निघण्टुग्रन्थस्य निर्मातृपदेन प्रजापतिः कश्यप एव प्रख्यात आसीत्। निघण्टौ पञ्च अध्यायाः सन्ति। आदिमाः त्रयः अध्यायाः नैघण्टुककाण्डम् इति अभिधीयते। चतुर्थः अध्यायो नैगमकाण्डम्, पञ्चमः अध्यायो दैवतकाण्डम् इति पदेन व्यपदिश्यते। प्रथमतः त्रिषु अध्यायेषु पृथिव्यादिबोधकानाम् अनेकशब्दानाम् एकत्र सङ्ग्रहः अस्ति। द्वितीयकाण्डम् एकपदीयम् अपि कथ्यते। नैगमः इत्येतस्य पदस्य तात्पर्यमिदम् अस्ति यद् एतस्य प्रकृतिप्रत्ययस्य यथार्थावगमनं न भवति - अनवगतसंस्कारांश्च निगमान्। दैवतकाण्डे देवतायाः स्वरूपस्थानयोः निर्देशः प्राप्यते।

७.५.१) निर्घण्टु-व्याख्याकाराः

सम्प्रति निघण्टुग्रन्थस्य एका एव व्याख्या समुपलब्धा भवति। अस्या व्याख्याया रचयिता देवराजयज्वा अस्ति। अस्य पितामहस्य अपि नाम देवराजयज्वा एव आसीत्। अस्य पितुः नाम यज्ञेश्वरः अस्ति। अयं हि विद्वान् रंगेशपुरी इत्याख्यस्य नगरस्य पार्श्ववर्तिनः कस्य अपि ग्रामस्य निवासी आसीत्। नाम्ना प्रतीतो भवति यद् अयं विद्वान् सुदूरदक्षिणभारतस्य एव निवासी आसीत्। अस्य समयस्य विषये मतद्वयं प्रचलितम् अस्ति। केषाञ्चित् विदुषां मते अयं विद्वान् सायणात् परवर्ती आसीत्, किञ्च यथार्थतः सायणात् पूर्ववर्ती एव अयम् आसीत्। आचार्यसायणेन ऋग्वेदीयमन्त्रस्य (१/६२/३) स्वकीये भाष्ये निघण्टुभाष्यवचनस्य उल्लेखः कृतः। उल्लेखोऽयं देवराजयज्वनः भाष्ये अपि किञ्चित् पाठान्तरेण समुपलब्धः भवति। अस्माद् भाष्याद् अतिरिक्तं न किम् अपि अन्यत् निघण्टुभाष्यं विद्यमानम् अस्ति।

देवराजयज्वा स्वभाष्यस्य उपोद्घाते क्षीरस्वामिनः तथा अनन्ताचार्यस्य निघण्टुव्याख्यायाः उल्लेखं कृतवान्। यथा - 'इदं च ..... क्षीरस्वामी अनन्ताचार्यकृतां निघण्टुव्याख्यां ...... निरीक्ष्य क्रियते।' अनन्ताचार्यस्य उल्लेखः अत्र प्रथमं एव अस्माकं प्राप्यते। क्षीरस्वामिनः मतस्य उल्लेखः अत्र बहुलतया कृतः अस्ति। क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारः अस्ति। यज्वनः उद्धरणम् 'अमरकोशोद्घाटने' यथावद् उपलब्धं भवति। अतः निघण्टुव्याख्यया यज्वने अभिप्रायः अस्य अमरकोशस्य एव व्याख्यया प्रतीतः भवति। अस्य भाष्यस्य नाम – निघण्टु-निर्वचनम् इति अस्ति। स्वप्रतिज्ञानुसारेण देवराजयज्वा नैघण्टुककाण्डस्य एव निर्वचनम् अधिकेन विस्तरेण कृतवान् (विरचयति देवराजो नैघण्टुककाण्डनिर्वचनम् -श्लो. ६)। अन्यकाण्डानां व्याख्या अत्यल्पा आकारा अस्ति। अस्मिन् उपोद्घाते स्कन्दस्वामिनः ऋग्भाष्यटीकातः, महेश्वरस्य निरुक्तभाष्यटीकातः च साहाय्यं गृहीतम् अस्ति। प्राचीनप्रामाण्याद् अपि सुष्ठु उद्धरणानि अनेकानि उदाहरणानि च सन्ति। सायणात् पूर्ववर्तित्वेन अस्या व्याख्यायाः तथा निरुक्तेः च विशेषं महत्त्वम् अस्ति।

७.५.२) निरुक्तकालः

निरुक्तयुगम् - निघण्टुकालानन्तरं निरुक्तानां समयः प्रारम्भो भवति। दुर्गाचार्यानुसारेण निरुक्तं चतुर्दशसङ्ख्यकम् आसीत्। ('निरुक्तं चतुर्दशप्रभेदम्'-दुर्गवृ. १/१३)। यास्कस्य निरुक्ते द्वादशानां निरुक्तकर्तॄणां नामानि मतानि च निर्दिष्टानि सन्ति। एतेषां नाम अक्षरक्रमेण एव अस्ति-१.अग्रायणः, २. औपमन्यवः, ३.औदुम्बरायणः,४.और्णवाभः, ५.काथक्यः, ६.क्रौष्टुकिः, ७.गार्ग्यः, ८.मालवः, ९.तैटिकिः,१०. वार्ष्यायिणिः,११.शाकपूणिः,१२.स्थौलाष्ठिविश्च। त्रयोदशः तु स्वयं यास्क एव अस्ति। एतेषां त्रयोदशानाम् आचार्याणाम् अतिरिक्तः कोऽस्ति चतुर्दशः आचार्यः। इति तु अज्ञातम् एव अस्ति। एतेषु ग्रन्थकारेषु शाकपूणेः मतम् आधिक्येन उद्धृतम् अस्ति। बृहद्देवतायाम् अपि अस्य मतस्य उल्लेखः प्राप्यते। बृहद्देवतायां तथा पुराणेषु च शाकपूणिः रथीतरशाकपूणि-नाम्ना स्मृतः अस्ति।

७.५.३) यास्कस्य निरुक्तम्

निरुक्तं वेदानां षडङ्गेषु अन्यतमम् अस्ति। सम्प्रति यास्करचितं निरुक्तम् एव अस्य वेदाङ्गस्य प्रतिनिधिग्रन्थः वर्तते। अस्मिन् निरुक्ते द्वादश अध्यायाः सन्ति। अन्ते द्वौ अध्यायौ परिशिष्टरूपेण स्तः। अनेन प्रकारेण समग्रग्रन्थः अयं चतुर्दशसु अध्यायेषु विभक्तः अस्ति। परिशिष्टभागम् अपि अर्वाचीनम् इति वक्तुं न शक्यते। यतो हि यास्क इव उव्वटः अपि परिशिष्टभागात् परिचितः आसीत्। उव्वटः स्वकीये यजुर्वेदभाष्ये (१८/७७), निरुक्ते (१३/१३) समुपलब्धं वाक्यं निर्दिष्टम् अकरोत्। अतः अस्य अंशस्य भोजराजात् प्राचीनत्वं स्वतः सिद्धम् अस्ति। यास्ककृतं निरुक्तं तु निघण्टुग्रन्थस्य व्याख्या अस्ति। अतः अस्य वेदाङ्गत्वम् अनुपपन्नम् इति आशङ्क्य समाधत्ते - 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।' अन्यच्च- 'एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेण उच्यन्ते तद् अपि निरुक्तम्।' अतः अस्य वेदाङ्गत्वं सिद्धम्।

यास्कस्य प्राचीनताया अत्र लेशतः अपि सन्देहस्य अवकाशः नास्ति। पाणिनेः अपि प्राचीनतरः अयम् अस्ति। संस्कृतभाषाया यः विकासः यास्कस्य निरुक्ते प्राप्यते तत् पाणिनेः अष्टाध्याय्यां व्याख्यातरूपतः प्राचीनतरम् अस्ति। महाभारतस्य मोक्षपर्वानुसारेण निघण्टोः कर्ता यास्को नासीत्। अस्य रचयिता कोऽपि प्रजापतिः काश्यप आसीत्-

'वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तरम्।
कपिर्वराहः श्रेष्ठश्च धर्मस्य वृष उच्यते।
तस्माद् वृषाकपि प्राह कश्यपो मां प्रजापतिः।।'

(महा.मो.प.अ.३४२,श्लो.८६-८७)

तत्र एव निघण्टोः व्याख्याता यास्कः आसीत्, इत्यस्य प्रमाणम् अपि समुपलब्धम् अस्ति-

'लिपिविष्टेति चाख्यायां हीनरोमा च योऽभवत्।
तेनाविष्टं तु यत्किञ्चित् शिपिविष्टेति च स्मृतः।।
यास्को मामृषिरव्यग्रोऽनेकयज्ञेषु गीतवान्।
शिपिविष्ट इति ह्यस्माद् गुह्यनाम परोह्यहम्।।
स्तुत्वा मां शिपिविष्टेति यास्कः ऋषिरुदारधीः।
मत्प्रसादादधोनष्टं निरुक्तमधिजग्मिवान्।।'

(म.भा.शा. प. श्लो.६९-७१)

इत्यादिना प्रमाणितस्य यास्कस्य कः काल इति विचारे प्रस्तुते-क) महाभारतस्य उपरि लिखितपद्यद्वयस्य उद्धरणात् ततः अर्वाचीनो महाभारतः, ख) पाणिनिः स्वकीये **वासुदेवार्जुनाभ्यां वुन्** ४/३/९८ इत्यस्मिन् सूत्रे कृष्णार्जुनौ स्मृतवान् इति ततः अयं प्राचीनः। पाणिनिः पाण्डुपुत्राद् अर्जुनात् परवर्त्ती सिद्धो भवति। पाण्डुपुत्राणां समयः तु राजतरङ्गिण्याम् एव वर्णितम् -

'शतेषु षट्सु साऽर्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः।।'

इदं सर्वं विचार्य ख्रीष्टपूर्वनवमशतकस्य पूर्वाद्धे यास्कः अजायत इति प्रतीयते। यास्कस्य अस्य ग्रन्थस्य महत्ता अत्यधिका अस्ति। ग्रन्थस्य आरम्भे यास्को निरुक्तस्य सिद्धान्तस्य वैज्ञानिकं प्रदर्शनम् अकरोत्। वेदार्थानुशीलनाय तदा अनेकपक्षाः आसन्। येषां नामानि अनेन प्रकारेण प्रदत्तानि सन्ति - १)अधिदैवतः,२)अध्यात्मः, ३)आख्यातसमयः,४)ऐतिहासिकाः, ५)नैदानाः, ६)नैरुक्ताः, ७)परिव्राजकाः,८) याज्ञिकाः च।

अनेन मतनिर्देशेन वेदार्थानुशीलनस्य इतिहासस्य उपरि विशिष्टरूपेण प्रकाशः प्रसरति। यास्कस्य प्रभावः अवान्तरकालिकस्य भाष्यस्य उपरि अस्ति। सायणः तु अस्याः पद्धत्या अनुसरणं

कृत्वा वेदभाष्यरचनायां कृतकार्यः अभवत्। यास्कस्य प्रक्रिया आधुनिकभाषावेत्तृणां प्रधानतः मान्या अस्ति। निरुक्तस्य एकमात्रप्रतिनिधित्वेन निरुक्तग्रन्थस्य सर्वातिशायि महत्त्वम् अस्ति।

पाठगतप्रश्नाः-६

३२. निघण्टौ कति अध्यायाः।

३३. निघण्टौ पञ्चमे अध्याये किं काण्डं वर्तते।

३४. निघण्टुग्रन्थस्य एकस्य व्याख्याकारस्य नाम उल्लिखत।

३५. क्षीरस्वामी कः।

३६. निरुक्ते केषां निरुक्तकाराणां नाम वर्तते।

३७. शाकपुणिः पुराणेषु केन नाम्ना स्मृतः।

३८. निरुक्तस्य कति अध्यायाः।

७.६) छन्दः

छन्दो वेदस्य पञ्चमम् अङ्गम् अस्ति। वेदाः सन्ति छन्दोबद्धाः, अतः तेषाम् उच्चारणनिमित्ताय छन्दोज्ञानं नितराम् अपेक्षितं भवति। छन्दोभिधेन एतेन अङ्गेन छन्दसां सर्वेषाम् उच्चारणविधिः तद्गतिप्रकारः तद्गानरीतिश्च विदिता भवति। तस्माद् वैदिकमन्त्रोच्चारणस्य प्रयोजनाय छन्दसः अध्ययनं पूर्वम् उचितम्। विना छन्दोज्ञानं यः वेदाऽध्यन-यजन-याजनादि-कार्याणि करोति तस्य तानि सर्वाणि फलप्रदायकानि कार्याणि न भवन्ति।

कात्यायनेन अत्र स्पष्टतया एव उक्तम् -

'यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति।' (सर्वानुक्रमणी १।१)

संहिताब्राह्मणेषु छन्दोनाम्नाम् उपलभ्यत्वात् छन्दोऽङ्गस्य अपि उत्पत्तिः वैदिकयुगे एव संवृत्तः इति प्रतीयते। अस्य वेदाङ्गस्य प्रतिनिधि-ग्रन्थः अस्ति पिङ्गलाचार्यकृतं 'छन्दःसूत्रम्'। अस्य ग्रन्थस्य रचयिता कदा बभूव । अस्य पर्याप्तपरिचयस्य अभावः अस्ति। अयं ग्रन्थः सूत्ररूपेऽस्ति। ग्रन्थोऽयम् अष्टसु अध्यायेषु विभक्तः अस्ति। प्रारम्भात् चतुर्थाध्यायस्य सप्तमसूत्रपर्यन्तं वैदिकच्छन्दसां लक्षणं प्रदत्तम् अस्ति। अस्य ग्रन्थस्य हलायुधकृता 'मृतसञ्जीवनी' व्याख्या अतीव प्रसिद्धा वर्तते।

लौकिककाव्येषु छन्दसः पादबद्धतायाः च सम्बन्धः एतावान् अस्ति यत् पद्येषु एव छन्दसो योजना मन्यते, तथा गद्यन्तु छन्दोहीनरचनारूपेण स्वीकृतं भवति। वैदिकच्छन्दसो विषये इयं धारणा अमान्या अस्ति। प्राचीनार्यपरम्परानुसारेण गद्यम् अपि छन्दोबद्धरचना एव मन्यते। दुर्गाचार्येण निरुक्तस्य स्ववृत्त्या (७।२) कस्यापि ब्राह्मणस्य वाक्यं समुद्धृतम्, यस्य आशयः अस्ति छन्दो विना वाणी

समुच्चरिता न भवति—'**नाच्छन्दसि वागुच्चरति**'। भरतमुनिः अपि छन्दोविरहितं शब्दं नैव स्वीकरोति -

'छन्दहीना न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्।'

(ना.शा.१४।४५)

कात्यायनमुनेः नाम्ना प्रख्यातं ऋग्यजुष-परिशिष्टं पूर्वोक्तं तथ्यं स्वीकरोति -

'छन्दोभूतमिदं सर्वं वाङ्मयं स्याद् विजानतः।

नाच्छन्दसि न चापृष्टे शब्दश्चरति कश्चन।।'

पूर्वोक्तमतानुसारेण वेदस्य न कोऽपि एवंविधः मन्त्रः अस्ति, यः छन्दसो माध्यमेन न निमिर्तः वर्तते। फलतो यजुर्वेदस्य मन्त्रः अपि यो हि निश्चयेन गद्यात्मकः अस्ति, छन्दोविरहितः नास्ति। तेन हि प्राचीनाचार्याः प्रथमाक्षरादारभ्य १०४ अक्षरपर्यन्तं छन्दसां विधानं स्वस्वग्रन्थेषु कृतवन्तः (द्रष्ट० —'वैदिकछन्दोमीमांसा' पृ. ८।९, रच० युधिष्ठिरमीमांसक)।

ऋग्वेदस्य सामवेदस्य च सर्वे मन्त्राः छन्दोबद्धाः सन्ति। हृदयस्थकोमलभावानाम् अभिव्यक्त्या नैसर्गिकमाध्यमं छन्दः एव अस्ति। अन्तःस्थलस्य मर्मस्पर्शिनः भावस्य अभिव्यक्तीकरणाय कविगणाः छन्दसां कमनीयकलेवरम् एव अन्विष्यन्ति। मन्त्राणां प्रधानम् उद्देश्यं यज्ञेषु उपास्यदेवतायाः प्रसादनकार्ये एवाऽस्ति, तथा इदम् अपि निश्चयेन वक्तुं शक्यते यद् देवतायाः प्रसादनस्य प्रमुखसाधनं मन्त्राणां गानम् एव भवितुं शक्यते। मन्त्राणां छन्दोबद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्यन्ते अतः छन्दः इति वेदाङ्गम् अवश्यं ज्ञेयम्। शौनकविरचिते ऋक्प्रातिशाख्ये चरमभागे छन्दसां पर्याप्तं विवेचनं विद्यते। अस्य छन्दःशास्त्रस्य पिङ्गलच्छन्दःसूत्रनामा ग्रन्थः सर्वाधिकप्रसिद्धः अस्ति। 'छन्दःपादौ तु वेदस्य'।

'छन्दः' इत्येतस्य पदस्य इयं व्युत्पत्तिः - छन्दयति (पृणाति) इति छन्दो वा छन्दयति (आह्लादयति) इति छन्दः अथवा छन्द्यते अनेनेति छन्दः। छन्दांसि च्छादनात् इत्येतद् यास्ककथनाद् वेदार्थवाचकं छन्दः इत्येतत्पदं छद् (छादने) धातोः निष्पन्नम्। वेदावरणकारित्वात् छन्दः इति पदं युक्तम् एव। दुर्गाचार्य आह - **'यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतः, तत् छन्दसां छन्दस्त्वम्।'**

इदं वाक्यं छान्दोग्योपनिषदि अपि पाठभेदेन प्राप्यते (१।४।२)। 'छन्दांसि छादनात्'(नि० ७। १९) अस्य एवार्थस्य सम्पुष्ट्यां दुर्गाचार्यस्य पूर्वोक्तवाक्यम् अस्ति। श्रुतिषु छन्दसो महनीयता भृशं गीता। असुरकृतेभ्यः विघ्नेभ्यः रक्षकत्वात् तस्य, तच्छक्तिशाली सैनिक इव मतम्। उक्तञ्च —**'दक्षिणतोऽसुरान् रक्षांसि त्वष्ट्रान्यपहन्ति त्रिष्टुब्जिर्वज्रो वैरविष्टुद्'। वैदिकानि** छन्दांसि अनेकभेद-उपभेदवन्ति सन्ति। प्रधानेषु वैदिकेषु छन्दःसु इमानि गण्यन्ते - गायत्री, उष्णिक्, अनुष्टुप्, प्रकृतिः, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, कृतिः, आकृतिः, विकृतिः ,संस्कृतिः, अभिकृतिः, उत्कृतिश्च । वैदिकच्छन्दसां विशिष्टता इयं यत् तानि अक्षरगणनायां नियतानि भवन्ति। न तत्र अक्षराणां गुरुलघुक्रमस्य कश्चित् नियमविशेषः वर्तते। उक्तञ्च कात्यायनेन - **'यदक्षरपरिमाणं तच्छन्दः।'** किञ्च लौकिकसंस्कृतस्य छन्दःसु इयं वार्ता नास्ति। तत्र तु वृत्तस्य

अक्षराणां गुरता लघुता निश्चिता एव अस्ति। शताब्द्यन्तरम् लौकिकच्छन्दसां विकासः पूर्वोक्तेभ्यः वैदिकच्छन्देभ्यः जातः इत्यपि स्मरणीयम्। लौकिकछन्दःसु चत्वारः चरणाः भवन्ति किन्तु वैदिकच्छन्दःसु अयं नियमः न भवति।

पाठगतप्रश्नाः-७

३९. छन्दःशब्दस्य व्युत्पत्तिः का।

४०. कात्यायनेन छन्दोविषये किमुक्तम्।

४१. छन्दश्शरीरस्य केन अङ्गेन सह तुल्यम्।

४२. लौकिकच्छन्दसि कति चरणाः।

४३. छन्दश्शास्त्रस्य प्रवर्तकः कः।

७.७) ज्यौतिषम्

यज्ञभागाः बहुविधाः सन्ति। केचन यज्ञाः संवत्सरसम्बन्धिनः सन्ति। केचन क्रतुसम्बन्धिनः च वर्तन्ते। केचन च तिथि-मास-पक्ष-नक्षत्रपरकाः वर्तन्ते। अयं भावः देवेषु यज्ञभागादीनां विधानं भिन्न-भिन्नकालेषु कृतं प्राप्यते। तैत्तिरीयब्राह्मणं वदति -

'वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत । शरदि वैश्य आदधीत' (तै. ब्रा. १।१)।

अष्टकायां फाल्गुन्यां पूर्णमासे च दीक्षाया विधानं विदधत् ताण्ड्यब्राह्मणं दीक्षितं भवति - **'एकाष्टकायां दीक्षेरन् फाल्गुनीपूर्णमासे दीक्षेरन्'** (ताण्ड्यब्रा. ५।९।१७)। प्रातः सायं च अग्नौ दुग्धाज्येन हवनस्य विधानम् अस्ति - **'प्रातर्जुहोति ,सायं जुहोति'**(तै.ब्रा. २।१।२)। यज्ञस्य साफल्यं न केवलम् उचितविधाने अस्ति प्रत्युत उचितसमयस्य नक्षत्रस्य अपि आवश्यकता वर्तते। असुराणां परिभाषां निर्दिशन्त्याः श्रुतेः वचनम्- **' ते असुरा अयज्ञा अदक्षिणा अनक्षत्राः। यच्च किञ्चाकुर्वत तां कृत्यामेवाकुर्वत ।'** एतद्विधाया वेदाज्ञायाः पालनं ज्योतिषशास्त्रज्ञाने सति एव यथायथं भवितुम् अर्हति। तस्मात् ज्योतिषं नाम वेदाङ्गम् अपि स्वीयं वैशिष्ट्यं निदधाति। इदं ज्योतिषम् कालविज्ञापकं शास्त्रम्। मुहूर्त्तं शोधयित्वा क्रियमाणाः यज्ञादिक्रियाविशेषाः फलाय कल्प्यन्ते, नान्यथा, तन्मुहूर्त्तज्ञानं च ज्योतिषायत्तम् अतः अस्य ज्यौतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम्। आर्चज्योतिषे अयमर्थ उक्तः -

' वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्।।'

चतुर्णाम् अपि वेदानां पृथक् पृथग् ज्योतिषशास्त्रम् आसीत्, तेषु सामवेदस्य ज्योतिषशास्त्रं न उपलभ्यते, त्रयाणाम् इतरेषां वेदानां ज्यौतिषाणि प्राप्यन्ते।

(१) ऋग्वेदस्य ज्यौतिषम् - आर्चज्यौतिषम्, षट्त्रिंशत्पद्यात्मकम्।

(२) यजुर्वेदस्य ज्यौतिषम् - याजुषज्यौतिषम्,ऊनचत्वारिंशत्पद्यात्मकम्।

(३) अथर्ववेदस्य ज्यौतिषम् - आथर्वणज्यौतिषम्, द्विषष्टि-उत्तरशतपद्यात्मकम्।

एतेषां त्रयाणाम् अपि ज्यौतिषाणां प्रणेता लगधो नाम आचार्यः। तत्र याजुषज्यौतिषस्य प्रामाणिकं भाष्यद्वयम् अपि प्राप्यते, एकं सोमाकरविरचितं प्राचीनम्, द्वितीयं सुधाकरद्विवेदीकृतं नवीनम्। एतस्य ज्यौतिषशास्त्रस्य त्रीणि वर्त्मानि, तस्मात् इदं शास्त्रं त्रिस्कन्धम् इत्युच्यते। तदुक्तम् -

'सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्

वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।।'

लगध-प्रणीतस्य वेदाङ्गज्यौतिषग्रन्थस्य श्लोकानां रहस्यं किम् इत्येतद् वस्तुतः विदुषाम् अपि दुर्गमम्। ग्रन्थस्य अस्य अवतीर्णस्य ३४०० वर्षाणि व्यतीतानि इति शङ्करबालदीक्षितस्य विचारः। लोकमान्यतिलक-सुधाकरद्विवेदि-डाँ० थीवोप्रभृतयः विद्वांसः ग्रन्थस्य अस्य श्लोकान् व्याख्यातुं प्रचेष्टितवन्तः। भारतीयस्य ज्यौतिषशास्त्रस्य अयम् आद्यः ग्रन्थः। मन्ये, ततः प्राक् ज्यौतिषि क्वापि काचित् कृतिः लिखिता न अभूत्। वेदाङ्गज्यौतिषशास्त्रस्य कर्त्ता असन्दिग्धरूपेण लगधः आसीत्।

' प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।

कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।' (आर्चज्यौतिष श्लो.)

किञ्च कोऽयं लगधः। इति कोऽपि न जानाति। यज्ञविधानाय ज्यौतिषशास्त्रस्य इदं महत्त्वं भास्कराचार्येण अपि स्वीकृतम् -

'वेदास्तावत् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।

शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्यौतिषशास्त्रस्योक्तमस्मात्।।'

(सिद्धन्तशिरोमणिः)

वेदाङ्गज्यौतिषस्य सम्मत्यां ज्यौतिषसमयः वेदाङ्गेषु मूर्धस्थानीयः अस्ति -

'यथा शिखामयूराणां नागानां मणयो यथा।

तद्वत् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्।।' (वेदाङ्गज्यौ. ४)

गच्छता कालेन इदं शास्त्रं संहितागणितजातकाख्येषु त्रिषु भागेषु आत्मानं प्रकटीचकार। आर्यभट्ट-वराहमिहिर-ब्रह्मगुप्त-भास्कराचार्यप्रभृतयः अगाधवैदुष्यवन्तः प्रतिभाशालिनः विश्वविदिताः ज्यौतिर्विदः अद्भुतान् सिद्धान्तान् अवतार्य शास्त्रमिदम् अभिनवेन रूपेण विभूषितवन्तः। इदं त्रिकालवर्त्तिनीम् अपि स्थितिं करतलामलकवत् करोति। एतेन परोक्षं भाविकालस्थितं च वस्तु प्रत्यक्षं जायते। सत्यमेव उक्तम् अस्य महिम्नि -

'वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमकल्मषम्।

विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति।।'

सर्वाणि अपि दर्शनानि, सकलानि शास्त्राणि, सर्वाः च उपनिषदः येषां हि परमरहस्यभूतानां वेदानां सौन्दर्यसुधां सततं पिबन्त्यः अपि न तृप्यन्ति, तान् वेदान् अनुशिलयितुं यथा साकल्य-आत्रेय-गार्ग्य-स्कन्दस्वामि-माधवभट्ट-नारायण-उद्गीथ-वेङ्कटमाधव-आनन्दतीर्थ-भवस्वामि-गुरुदेव-क्षुर-भट्टभास्करमिश्र-उव्वट-महीधर-भरतस्वामि-गुणविष्णु -सायणप्रभृतयः प्रीत्या भक्त्या च नितान्तम् एव प्रयासं कृतवन्तः, तथैव देशान्तरीयाः अपि विद्वांसः वेदस्य अमृतं पातुं तान् व्याख्यातुम् अध्येतुं वा प्रयत्नं कृतवन्तः।

वेदस्य षट्त्सु अङ्गेषु ज्यौतिषनाम अङ्गं नितान्तं महत्त्वपूर्णम् अङ्गम् अस्ति। यज्ञानां प्रतिपादनाय एव वेदाः प्रवृत्ताः। तेषां हि यज्ञानां विधानं समुचिते काले विधीयते चेत् तदैव तत्फलं लभ्यते। ज्यौतिःशास्त्रं यज्ञविधानस्य युक्ततरं कालं निर्दिशति तस्मात् एतत् शास्त्रं तत्कालविधायकशास्त्रम् इत्येतेन च नाम्ना भुवि सर्वत्र प्रख्यातं वर्त्तते।

पाठगतप्रश्नाः-८

४४. ऋग्वेदस्य ज्यौतिषं किम्।

४५. यजुर्वेदस्य ज्यौतिषम् किम्।

४६. अथर्ववेदस्य ज्यौतिषम् किम्।

४७. आर्चज्योतिषे किमुच्यते।

४८. वेदाङ्गज्यौतिष्-शास्त्रस्य कर्त्ता कः।

४९. ज्योतिषं कतिविधम्।

५०. वेदस्य निर्मलं चक्षुः किम्।

५१. ज्योतिषशास्त्रस्य अपरं नाम् किम्।

पाठसारः

धर्मार्थकाममोक्षाः - इत्येते चत्वारः पुरुषार्थाः वर्तन्ते। एषां पुरुषार्थानां प्राप्तये एव जनः सर्वदा भ्रमति। साङ्गवेदस्य अध्ययनेन एते लब्धुं शक्याः। तस्मात् साङ्गाः एव वेदाः अध्येयाः। अन्यथा केवलं वेदाध्ययनेन सामूहिकं ज्ञानं अध्येतृ-मनसि न जायते। अतः शिक्षाशास्त्रेण वेदमन्त्राणां शुद्धोच्चारणूर्वक - वेदपाठेन वेदमहिम्नः कीर्तनं तथा वेदरक्षणं च सम्भवति। कर्मज्ञानाय तथा यज्ञविधानज्ञानाय कल्पशास्त्रस्य पाठः कर्तव्यः। व्याकरणज्ञानं विना तु वेदमन्त्रस्य का कथा। तत्र वाङ्मयमात्रज्ञानम् एव न जायते। निःशेषेण उक्तस्य निरुक्तस्य ज्ञानम् अपि अत्यावश्यकम्। छन्दोज्ञानेन वेदस्य सम्यक् पाठः भवति, पठितृमनसि च आनन्दोद्भवः भवति। ज्यौतिःशास्त्रं यज्ञविधानस्य युक्ततरं कालं निर्दिशति,

तस्मात् ज्योतिषशास्त्रस्य च सर्वत्र एव मान्यता वर्तते। एतान् वेदाङ्गान् सम्यक् ज्ञात्वा वेदः अधीयते चेत् सम्पूर्णं फलं लभ्यते।

पाठान्तप्रश्नाः

१. षट्सु अङ्गेषु प्राधान्येन किं किं प्रतिपादितम्।
२. वेदाङ्गानि व्याख्यात।
३. इन्द्रः वृत्रासुरम् कथं जघान ।
४. शिक्षाशास्त्रस्य कांश्चन ग्रन्थान् निर्दिशत ।
५. भरद्वाजशिक्षां व्याख्यात।
६. यथेच्छं शिक्षाशास्त्रस्य ग्रन्थत्रयं रचयितृपरिचयनिर्देशपुरःसरं व्याख्यात।
७. कल्पशास्त्रं व्याख्यात।
८. व्याकरणशास्त्रं विशदयत।
९. छन्दःशास्त्रं व्याख्यात।
१०. ज्योतिष्-शास्त्रं विशदं व्याख्यात।
११. यास्कस्य निरुक्तं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. उपकारकः।
२. अङ्ग्यन्ते ज्ञायन्ते अमीभिः इति अङ्गानि इति विग्रहः।
३. कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति।
४. शिक्षा, कल्पः, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं च।
५. 'ब्राह्मणेन निष्कारणः धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति

उत्तराणि-२

६. 'अथ शिक्षां व्याख्यास्यामः - वर्णाः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः'।
७. स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा इति।
८. बाभ्रव्यः।
९. 'उच्चैरुदात्तः', 'नीचैरनुदात्तः', 'समाहारः स्वरितः' चेति।
१०. आचार्यगालवकृतः शिक्षाग्रन्थः।

११. व्यासशिक्षा, भरद्वाजशिक्षा, पाणिनीयशिक्षा इत्यादि।

उत्तराणि-३

१२. संहिताशिक्षा।

१३. षष्टिः।

१४. लोपागमविकारप्रकृतिभावाख्यानां चतुर्विधसन्धीनाम्।

१५. वाजसनेयीसंहितया।

१६. त्रयोदश।

१७. सन्धिस्वरवर्णादीनाम्।

१८. त्रिंशदुत्तरशतम्(१३०)।

१९. आस्तिकमुनेः वंशजः गोकुलदैवज्ञस्य पुत्रः केशवदैवज्ञः।

२०. उपमन्युगोत्रीयः अग्निहोत्री खगपतिमहोदयस्य पुत्रः मल्लशर्मा इति नामकः कोऽपि कान्यकुब्जब्राह्मणः।

२१. अथर्ववेदेन।

उत्तराणि-४

२२. श्रौतसूत्राणि स्मार्त्तसूत्राणि च।

२३. गृह्यसूत्राणि धर्मसूत्राणि च।

२४. १.श्रौतसूत्रम्,२. गृह्यसूत्रम्, ३. धर्मसूत्रम्, ४.शुल्वसूत्रं चेति।

२५. आश्वलायनम्, शाङ्खायनश्चेति।

२६. लाट्यायनश्रौतसूत्रम्, द्राह्यायणश्चेति

उत्तराणि-५

२७. व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्।

२८. दण्डिना

२९. मुखेन

३०. वृषभरूपकत्वेन।

३१. अष्टौ। इन्द्रः चन्द्रः काशकृत्स्नः आपिशलिः शाकटायनः पाणिनिः अमरः जैनेन्द्रः चेति।

उत्तराणि-६

३२. पञ्च।

३३. दैवतकाण्डम्।

३४. देवराजयज्वा।

३५. क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारः, निघण्टु-निर्वचनम् इति ग्रन्थस्य व्याख्याता च।

३६. १.अग्रायणः, २. औपमन्यवः, ३.औदुम्बरायणः,४.और्णवाभः, ५.काथक्यः, ६.क्रौष्टुकिः, ७.गार्ग्यः, ८.मालवः, ९.तैटिकिः,१०. वार्ष्यायणिः,११.शाकपूणिः,१२.स्थौलाष्ठिविश्च।

३७. रथीतरशाकपूणि-नाम्ना।

३८. द्वादश।

उत्तराणि-७

३९. छन्दयति (पृणाति) इति छन्दो वा छन्दयति (आह्लादयति) इति छन्दः अथवा छन्द्यते अनेनेति छन्दः।

४०. यदक्षरपरिमाणं तच्छन्दः

४१. पादाभ्यां साकम्

४२. चत्वारः।

४३. पिङ्गलर्षिः।

उत्तराणि-८

४४. आर्चज्यौतिषम्, षट्त्रिंशत्पद्यात्मकम्।

४५. याजुषज्यौतिषम्, ऊनचत्वारिंशत्पदात्मकम्।

४६. आथर्वणज्यौतिषम्, द्विषष्टि-उत्तरशतपद्यात्मकम्।

४७. वेदा हि यज्ञार्थम् अभिप्रवृत्ताः..इत्यादिः।

४८. लगधः

४९. सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।

५०. ज्योतिष-शास्त्रम्।

५१. तत्कालविधायकशास्त्रम्।

॥इति सप्तमः पाठः॥